**अंशुसटा** ( aṁśu-saṭā ) *f.* the mane-like rays पूर्वः…चन्द्रार्कांशुसटाकलापकलितो वायुर्यदाकाशतः BṛSaṁ. 27. 1(VBSGM)

**अंशुसंतति** ( aṁśu-santati ) *f.* the row or line of rays अग्रतः प्रचलितस्य खरांशोरंशुसंततिरिवैक्ष्यत संध्या Acyutarā. 8. 11; 8. 3.

**अंशुसमूह** ( aṁśu-samūha ) *m.* the multitude of rays, the heap of rays व्यानशे शशधरेण विमुक्तः…।…वासवस्य दिशमंशुसमूहः Kirātā. 9. 17; हे हिमद्युते चन्द्र…त्वया तिग्मद्युतेः सूर्यस्य अंशुसमूहा अमृतीकृताः AlaṅkāMañ. 105. 15.

**अंशुसंपर्क** ( aṁśu-samparka ) *m.* contact with the ray(s) विनार्कस्यांशुसंपर्के ध्वान्तध्वंसनचेतसः । न प्राप्नोति कलावृद्धिं शिवोपासनया शशी MohaRāPa. 5. 5.

**अंशुसंमर्द** ( aṁśu-sammarda ) *m.* a particular planetory conflict असंयुक्तबिम्बयोरन्योन्यरश्मिसंश्लेषोंऽशुसंमर्दः AdbhuSāg. 207. 21.

**अंशुसर्वस्व** ( aṁśu-sarvasva ) *n.* the entire wealth of rays स्वकीयमंशुसर्वस्वं न्यासीकृतमिवेन्दुना PariPar. 2. 135.

**अंशुसहस्र** ( aṁśu-sahasra ) *n.* a thousand rays सहैवांशुसहस्रेण प्रदोषो ग्रसते रविम् Kapphiṇā. 16. 43.

**अंशुस्नान** ( aṁśu-snāna ) *n.* bathing in the sun-shine (rays) मृज्जलानलवातांशुस्नानैः शौचं वदन्ति ये TriṣaS'aPuC. iii. 6. 102.

**अंशुस्रोतस्** ( aṁśu-srotas ) *n.* a stream of rays or lustre यदंशुस्रोतसः सङ्गादुत्तमाङ्गेऽपि धूर्जटेः । नेन्दुः क्षीरोदकल्लोलनिवासप्रीतिमुज्झति S'rīKaC. 4. 4.

**अंशुहस्त** ( aṁśu-hasta ) *m.* **A** the sun, having the rays as his hands मित्रो ध्वान्तारातिरब्जांशुहस्तः AbhidhāCin. 96; दिवसकरदृशानोष्णांशवश्चांशुहस्तः KośaKaTa. 1. 657. *fn.*; **B** the hand in the form of the ray भाव्यमिह स्तेनेन स्फुटमस्य हि तद्गतेंऽशुहस्तेऽनेन Nalo. 2. 48.

**अंशुहेतुत्व** ( aṁśu-hetutva ) *n.* the state of being productive of the strand of a cob-web प्रकृत्यैवांशुहेतुत्वमूर्णनाभेऽपि नेष्यते । प्राणिभक्षणलाम्पट्याल्लालाजालं करोति यत् TattvSaṁ. 168.

**अंशूत्कर** ( aṁśūtkara ) *m.* heap of rays, multitude of rays अंशूत्करैरुदजिहीत च शीतरश्मिः HarVi. 20. 42.

**अंशूदक** (aṁśūdaka ) *n.* water exposed to the rays (of the sun and the moon) दिवा सूर्यांशुसंतप्तं रात्रौ चन्द्रांशुशीतलम् । अंशूदकमिति ख्यातं सर्वरोगनिवारकम् HārīS. i. 7. 80; i. 7. 71; शस्तं शरदि नादेयं (of the river) नीरमंशूदकं परम् BhāvPra.(Bhā.) vi. (13). 61; v. 348; viii. (1). 74.

**अंशेतराल्पता** ( aṁśetarālpatā ) *f.* fewness or rarity of the Svaras (notes) other than the key-note रिलोपात्षाडवं ज्ञेयं पूर्णत्वेंऽशेतराल्पता SaṁgīRa. i. 7. 89.

**अंशैक्य** ( aṁśaikya ) *n.* union with the numerator, a sum with the addition of the numerator(s) भग्नगणो द्विः कनसीधीधै सेतै क्रमाद्धृतोंऽशैक्यम् । पातः स्यात् ĀryaSi. 2. 16(51); अंशैक्यहरवधोंऽशो दृश्यं तद्भाजितं भवति योगे ĀryaSi. 15. 21(148); अंशैक्योनेनाप्तं दृश्यं फलमत्र भवति मूलधनम् GaṇiSāSaṁ. 5. 206.

**अंशोक्ति** ( aṁśokti ) *f.* statement of a part, a partial statement क्वचिद्विशेषनिष्ठत्वेन निषिध्यते क्वचित्पुनरंशोक्तावंशान्तरगतत्वेनेत्यत्रापि द्वौ भेदौ AlaṅkāSa. 115. 5; अंशोक्तावंशान्तरस्य वा निषेधः PratāYaBhū. 440. 8; क्वचिदंशोक्तावंशान्तरे निषेधः SāhiDa. 587. 4.

**अंशोत्पत्ति** ( aṁśotpatti ) *f.* the ascertainment of the numerator, finding the numerator अत्रांशोत्पत्तौ सूत्रम् GaṇiSāSaṁ. 2. 71.(1)

**अंशोत्पादकसूत्र** ( aṁśotpādaka-sūtra ) *n.* the rule for finding the numerator एकांशवृद्धीनां राशीनां युतावंशाद्धारस्याधिक्ये सत्यंशोत्पादकसूत्रम् GaṇiSāSaṁ. 2. 72.(1)

**अंशोत्सर्ग** ( aṁśotsarga ) *m.* giving up a part of one's self (as an incarnation) जगत्यर्थे कृतो योऽयमंशोत्सर्गो महात्मभिः HariVaṁ. 45. 14.

**अंशोद्भव** ( aṁśodbhava ) *adj.* **A** (the āyurdāya) originating from the Aṁśa = Aṁśāyurdāya period of life अंशोद्भवं विलग्नात् पैण्डं भानोर्निसर्गजं चन्द्रात् HorāSā 7. 19; **B** born or produced from only a part, partial incarnation एकादशविधा रुद्राः तस्य चांशोद्भवास्तथा LiṅgaP. i. 5. 29.

**अंशोपासन** ( aṁśopāsana ) *n.* meditation on a part इह वैश्वानरविद्यामुपासनमंशेन समस्तेन वेति संदिह्यते…अंशोपासनमुचितमिति पूर्वः पक्षः BrahmSūBh.(S'rī.) ii. 375. 10 (*on* iii. 3. 55)

**अंश्वदाभ्यन्याय** ( aṁśvadābhya-nyāya ) *m.* the Mīmāṁsā rule for deciding the nomenclature based on the cases of Aṁśu and Adābhya dealt with in the MīmāSū. ii. 3. 20 अंश्वदाभ्यन्यायेन उपांश्वन्तर्यामिशब्दयोरपि नामत्वमिति भावः MayūMāli. 67. 12 (*on* i. 4. 4)

**अंश्वधिकरण** ( aṁśvadhikaraṇa ) *adj.* having the threads as its substratum गुणकर्मणां पटस्य च प्रध्वंसः किमधिकरणः प्रतीयते इति वक्तव्यम् । अंश्वधिकरण एवेति चेत् NyāyKuA. i. 97. 3.

**अंश्वन्तर** ( aṁśvantara ) *n.* another fibre of a thread अथवा अंश्वन्तरविभागोत्पत्तिसमकालं तस्मिन्नेव तन्तौ कर्मोत्पद्यते PadārthaSaṁ. 154. 8; अंशुक्रियया अंश्वन्तराद्विभागः NyāKa. 163. 22; Kiraṇā. 244. 7.

**अंश्वादि** ( aṁśvādi ) *m.* a *gaṇa* in P. vi. 2. 193 प्रतेरंश्वादयस्तत्पुरुषे ।

**अंस्** ( aṁs– ) x. P. [so found in DhātuPra. x. 359; DhātuVṛ. x. 363; DhātuPā.(C.); DhātuPā.(J.); DhātuPā.(S'ā.) x. 129; a variant for **अंश्** x. P. meaning समाघात]

1**अंस** ( áṁsa ) *m.* (*m.* and *n.* according to Liṅgānu.(Pā.) 108. 17; (S'ā.) 119. 6; (Ha.) 48. 10; (He.) 136. 13 and Kośas : AmaK. 1230; AbhidhāRaMā. 2. 370; KalpaK. 482. 192; KośaKaTa. 2. 2831; S'abdaBhePra.(Ma.) 4. 1; Vaija. 178. 71; NāmMā. 101; *n.* Mānaso. iii. 1. 398; Yādavā. 15. 106) [IE word not traceable to a root Pok. 778; Mayr. 14. Add; / अस्यते भारेण अंसं स्कन्धः GaṇRa. 2. 68; अंस समाघाते । अंसः DhātuPra. x. 359; अमेः सन् Uṇā. 5. 21; PadMañ. *on* KāśiVṛ. *on* P. vi. 2. 138; SiddhāKau. 563B. 11; Prasā. ii. 642. 7; अंसौष्ठशब्दौ च प्रत्ययस्य नित्त्वादाद्युदात्तौ KāśiVṛ. *on* vi. 2. 138; अंसो वृषादित्वादाद्युदात्तः Nyās. 2. 417] **1A** shoulder in a wide sense **B** the back of the shoulder **C** the side of the shoulder **D** the front part of the shoulder **E** various specific parts of the shoulder **F** (in Astrol.) a region of the body **G** (in Anat.) various parts and elements of the shoulder region **2 i** shoulder of an animal **ii** of a bull **iii** of a cow **iv** of a horse **v** of an elephant **vi** of the man-lion **3A** the two upper corners of the sacrificial altar **B** the square marked to locate the aṁsa of the Vedi **C** the point fixed to delimit the aṁsa of the Vedi **D** marks on the cord **4** the protuberance of a ladle **5** the root of the wing **6** the flanks of a building **7 i** name of a Gandharva **ii** of a king.

**1 A** shoulder in a wide sense (the part of the body from the neck to the arm-pits, inclusive of the various regions expressed by words like स्कन्ध, भुजशिरस्, बाहुमूल, स्कन्धपृष्ठ, स्तनबाह्वन्तर) अंसेष्वेषां नि मिमृक्षुर्ऋष्टयः ṚV. i. 64. 4; अंसेष्वा वः प्रपथेषु खादयः ṚV. i. 166. 9; स्वयं दास उरो अंसावपि ग्ध ṚV. i. 158. 5; i. 166. 10; i. 168. 3; v. 54. 11; v. 57. 6; vii. 56. 13; यक्ष्मं दोषण्य१मंसाभ्यां बाहुभ्यां वि वृहामि ते ṚV. x. 163. 2 = AV. ii. 33. 2; य आत्मानमतिमात्रमंस आधाय बिभ्रति AV. viii. 6. 13; AV. ix. 4. 8; x. 2. 5; उदरमंसौ ग्रीवाश्च श्रोणी…विशो मेऽङ्गानि VājaS. 20. 8; अंसयोर्वा इदं शिरः प्रतिष्ठितम् S'atBr. XIV. i. 3. 10; अथेतरः सव्यमन्वंसमभ्यवेक्षते S'āṅkhāĀ. 4. 15 (18. 18); अंसेऽध्वर्युमन्वारभेत…पाणिना ĀśvaS'S. I. i. 3.25; अहतेन वाससा दक्षिणमंसं यजमानः प्रोर्णुते ĀpaS'S. x. 9. 8; xi. 21. 3; xxiv. 12. 7; S'āṅkhāS'S. i. 6. 3; अध्यंसौ पाणी कृत्वा हृदयदेशमालभेत ĀśvaGS. i. 20. 9; अथास्या उपोत्थाय दक्षिणेन हस्तेन दक्षिणमंसं प्रतिबाहुमन्ववहृत्य हृदयदेशमभिमृशति BaudhGS. i. 4. 1; अथास्याः सव्येंऽसे… वाससो ग्रन्थिं क्रियमाणमनुमन्त्रयेत VārāGS. 15. 26; HirGS. i. 5. 8; (वृकोदरः) अंसयोश्च यमौ कृत्वा… मोक्षयामास पावकात् MahāBhā. iii. 13. 83; प्रतिजग्राह तां (गदां) कृष्णः पीनेनांसेन MahāBhā. vii. 67. 51; दशग्रीवः…वामे चांसेऽवसज्याथ शुभे यष्टिकमण्डलू Rāmā. iii. 44. 3; अंसेन संश्लिष्य च कूबराग्रम् BuddhaC. 3. 60; Saund. 4. 16; तथांसगण्डयोः स्पर्शात् स्पर्शमेवं विनिर्दिशेत् NāṭyaS'ā. 22. 83; मध्यः क्लान्ततरः प्रकामविनतावंसौ S'āk. 3. 12; विस्रस्तमंसादपरो विलासी…प्रालम्बमुत्कृष्य यथावकाशं निनाय RaghuVa. 6. 14; नायकस्यांस एको द्वितीयकः प्रसारित इति पुनःपुनर्व्यत्यासेन वेणुदारितकम् KāmSū. 140. 13 (2. 6); 100. 7 (2. 2); अवलम्ब्य च…दक्षिणेन च हस्तेन माधवगुप्तमंसे HarṣaC. 316. 2; यान्तीनां सममसितभ्रुवां नतत्वादंसानां महति नितान्तमन्तरेऽपि S'iśuVa. 8. 2; जयश्रियं दक्षिणमंसमंसलौ …नृपती…समं समारोपयतः स्म संयति RāghPāṇ. (Dha.) 6. 3; विन्यस्य प्लवगपतिं विसंज्ञमंसे निस्त्रिंशः स निजपुरं प्रति प्रतस्थे RāmC. 34. 33; तस्यांसौ श्रियमापतुः । जयलक्ष्मीकृतावासौ तुङ्गावट्टालकाविव MahāP. 15. 19; शरीरमेव शरीरस्य न कुत्रचिदप्यंसमधिरोहति VakroJī. 24. 18; प्रियस्यांसे पीने लुलित इव घनः केशपाशः सुकेश्याः KāvyMi. 85. 2; वार्मण्येषा भवेन्मुद्रा द्वावंसावनया स्पृशेत् LakṣmīT. 34. 23; न्यसेद्वर्णान् गण्डांसोरुपदेषु च S'āraTi. 15. 9; कचदेशललाटांसतुल्याः प्रोक्ताः (दण्डाः) ViṣṇuDhaP. ii. 85. 25; स तु ब्रह्मऋषेरंसे गतासुमुरगं रुषा…निधाय पुरमागमत् BhāgP. i. 18. 30; त्रिपताकौ हस्तौ अंसकपोलललाटानामन्यतमक्षेत्रे कृतौ AbhinBhā. ii. 74. 11 (*on* 9. 195); ललाटांसहृदादिषु । धारयेयुस्त्रिपुण्ड्राणि ĪśānS'iPa. ii. 3. 112; विगलितकबरीभारमंसे वहन्त्याः … वपुः … लक्ष्म्याः पुनातु VyaktiVi. 44. 4; अंसः सवल्कलग्रन्थिः सजटापल्लवं शिरः NavaSāC. 11. 97; DvyāśraKā. 5. 22; उभावंसौ नतौ कार्यौ Mānaso. iv. i. 92; तस्य पीनोन्नतावंसौ लीलाशैलौ नृपश्रियः PāṇḍaC. 1. 457; अंसे कृष्णाजिनश्रीः PārvPa. 4. 6; सख्युरंसे करं दक्षिणं न्यस्य StavMā. 201. 9; तदनु कापि नाम पशुपाङ्गना कान्तमंससमवलम्बते स तव Nāray.